देवार्थं तर्पणं येषां दुर्गाण्यभितरन्ति ते ॥
सन्तुष्टः को न शक्नोति फलमूलैश्च जीवितुम् ।
सर्व्व एव हि साम्येन शङ्कटान्यवगाहते ॥
लोभात् क्रोधः प्रभवति लोभाद्द्रोहः प्रवर्त्तते ।
लोभान्मोहश्च माया च मानो मत्सर एव च ॥
रागद्वेषानृतक्रोधलोभमोहमदोज्झितः ।
यः स शान्तः परं लोकं याति पापविवर्ज्जितः ॥
देवता मुनयो नागा गन्धर्व्वा गुह्यका नराः ।
धार्म्मिकं पूजयन्तीह न धनाढ्यं न कामिनम् ॥
न मन्त्रबलवीर्य्येण प्रज्ञया पौरुषेण वा ।
अलभ्यं लभते मर्त्यस्तत्र का परिदेवना ॥
यथामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि ।
आकाशे पक्षिभिर्न्नित्यं तथा सर्व्वत्र वित्तवान् ॥
सर्व्वसत्त्वदयालुत्वं सर्व्वेन्द्रियविनिग्रहः ।
सर्व्वत्रानित्यबुद्धित्वं श्रेयः परमिदं स्मृतम् ॥
पशून्निवाशतो मर्त्युं यो धर्म्मं नाचरेन्नरः ।
अजागलस्तनस्येव तस्य जन्म निरर्थकम् ॥
भ्रूणहा ब्रह्महा गोघ्नः पितृहा गुरुतल्पगः ।
भूमिं सर्व्वगुणोपेतां दत्त्वा पापैः प्रमुच्यते ॥
न गोदानात् परं दानं किञ्चिदस्तीति मे मतिः ।
सा गौर्न्न्यायार्ज्जिता दत्ता कृत्स्नं तारयते कुलम्॥
नान्नदानात् परं दानं किञ्चिदस्ति वृषध्वज ! ।
अन्नेन धार्य्यते सर्व्वं चराचरमिदं जगत् ॥
कन्यादानं वृषोत्सर्गं जपस्तीर्थं श्रुतं तथा ।
हस्त्यश्वरथदानानि मणिरत्नवसुन्धराः ॥
अन्नदानस्य सर्व्वाणि कलां नार्हन्ति षोड़शीम् ।
अन्नात् प्राणो बलं तेजश्चान्नाद्वीर्य्यं धृतिः स्मृतिः॥
कूपवापीतड़ागादि आरामाणि च कारयेत् ।
त्रिःसप्तकुलमुद्धृत्य विष्णुलोके महीयते ॥
साधूनां दर्शनं पुण्यं तीर्थादपि विशिष्यते ।
कालेन फलते तीर्थं सद्यः साधुसमागमः ॥
सत्यं दमस्तपः शौचं सन्तोषः क्षान्तिरार्ज्जवम् ।
ज्ञानं शमो दया दानमेष धर्म्मः सनातनः ॥”
इति गारुड़े २२५ अध्यायः ॥

धर्म्मसुतः, पुं, (धर्म्मस्य सुतः ।) युधिष्ठिरराजः । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । २ । ७ । १६ ।
“एकान्ते विदुरेणोक्तो राजा धर्म्मसुतः शुचिः॥”
नरनारायणमुनी । यथा, देवीभागवते । ४ । ७ । १२ ।
“इति सञ्चिन्त्यमानं तं भ्रातरं दीनमानसम् ।
उवाच वचनं तथ्यं नरो धर्म्मसुतोऽनुजः ॥”)

धर्म्मसूः, पुं, (धर्म्मं सूते इति । सू+क्विप् ।) धर्म्याटपक्षी । इति शब्दरत्नावली ॥ (धर्म्मप्रेरके, त्रि । यथा, तैत्तिरीयब्राह्मणे । १।७।८।३।
“सोमो राजा वरुणः । देवा धर्म्मसुवश्च ये ॥”)

धर्म्मात्मा, [न्] पुं, (धर्म्मे आत्मा स्वभावो यस्य ।) कुमारपालः । स तु आर्हतविशेषः । इति हेमचन्द्रः ।३।३७७॥) त्रि, धर्म्मशीलः । यथा,—
“महर्षिर्भगवान् व्यासः कृत्वेमां संहितां पुरा ।
श्लोकैश्चतुर्भिर्द्धर्म्मात्मा पुत्त्रमध्यापयत् शुकम् ॥”
इति महाभारतम् ॥

धर्म्माधर्म्मपरीक्षणं, क्ली, (धर्म्मस्य अधर्म्मस्य तयोः परीक्षणम् ।) परीक्षाविशेषः । यथा,—
“अधुना संप्रवक्ष्यामि धर्माधर्म्मपरीक्षणम् ।
हन्तॄणां याचमानानां प्रायश्चित्तार्थिनां नृणाम्॥
राजतं कारयेत् धर्म्मंमधर्म्मं सीसकायसम् ।
लिखेत् भूर्ज्जे पटे वापि धर्म्माधर्म्मौ सितासितौ ॥
अभ्युक्ष्य पञ्चगव्येन गन्धमाल्यैः समर्च्चयेत् ।
सितपुष्पस्तु धर्म्मः स्यादधर्म्मोऽसितपुष्पधृक् ॥
एवं विधायोपलिप्य पिण्डयोस्तौ निधापयेत् ।
गोमयेन मृदा वापि पिण्डौ कार्य्यौ समन्ततः ॥
मृद्भाण्डक उपहृते स्थाप्यौ चानुपलक्षितौ ।
उपलिप्ते शुचौ देशे देवब्राह्मणसन्निधौ ॥
आवाहयेत् ततो देवान् लोकपालांश्च पूर्व्ववत्॥
धर्म्मावाहनपूर्व्वन्तु प्रतिज्ञापत्रकं लिखेत् ।
यदि पापविमुक्तोऽहं धर्म्मस्त्वायातु मे करे ॥
अशुद्धश्चेन्मम करे पापमायातु धर्म्मतः ।
अभियुक्तस्तयोश्चैकं प्रगृह्णीताविलम्बितः ॥
धर्म्मे गृहीते शुद्धः स्यादधर्म्मे तु स हीयते ।
एवं समासतः प्रोक्तं धर्म्माधर्म्मपरीक्षणम् ॥”
इति मिताक्षरा ॥

धर्म्माधिकरणं, क्ली, (अधिक्रियते अस्मिन्निति । अधि+कृ+अधिकरणे ल्युट् । धर्म्मस्य अधिकरणम् ।) राज्ञो विचारस्थानम् । यथा,—
“धर्म्मशास्त्रानुसारेण अर्थशास्त्रनिरूपणम् ।
यत्राधिक्रियते स्थाने धर्म्माधिकरणं हि तत् ॥”
इति वीरमित्रोदये कात्यायनवचनम् ॥*॥
“पुरुषान्तरतत्त्वज्ञाः प्रांशवश्चाप्यलोलुपाः ।
धर्म्माधिकरणे कार्य्या जनाह्लानकरा नराः ॥”
इति मत्स्यपुराणे १८६ अध्यायः ॥

धर्म्माधिकरणः, पुं, (धर्म्माधिकरणं आश्रयत्वेनास्त्यस्येति । अच् ।) धर्म्माध्यक्षः । तस्य लक्षणम् । यथा, मत्स्यपुराणे १८६ अध्याये ।
“समः शत्रौ च मित्रे च सर्व्वशास्त्रविशारदः ।
विप्रमुख्यः कुलीनश्च धर्म्माधिकरणो भवेत् ॥”

धर्म्माधिकरणी, [न्] पुं, (धर्म्माधिकरणं विचार्य्यस्थानत्वेनास्त्यस्येति । धर्म्माधिकरण+इनिः ।) धर्म्माधिकरणविशिष्टः । जज् इति इंराजी भाषा । तत्पर्य्यायः । धर्म्माध्यक्षः२ धार्म्मिकः३ । इति हेमचन्द्रः । ३ । ३८६ ॥ प्राड्विवाकः ४ अक्षदर्शकः ५ । इत्यमरः । २ । ८ । ५ ॥

धर्म्माध्यक्षः, पुं, (धर्म्मे धर्म्माधिकरणे अध्यक्षः ।) धर्म्माधिकरणी । इति हेमचन्द्रः । ३ । ३८८ ॥
“कुलशीलगुणोपेतः सर्व्वधर्म्मपरायणः ।
प्रवीणः प्रेषणाध्यक्षो धर्म्माध्यक्षो विधीयते ॥”
इति चाणक्ये । १०२ ॥
(विष्णुः यथा, महाभारते । १३ । १४६।२८ ।
“लोकाध्यक्षः सुराध्यक्षो धर्म्माध्यक्षः कृताकृतः॥”
“धर्म्माधर्म्मौ साक्षादीक्षते अनुरूपं फलं दातुम्।
तस्माद्धर्म्माध्यक्षः ।” इति शाङ्करभाष्यम् ॥)

धर्म्मारण्यं, क्ली, (धर्म्माय धर्म्मस्य वा यदरण्यम् ।) पुण्यवनविशेषः । तस्य नामकारणं यथा,—
“स धर्म्मः पीड़ितः सर्व्वं सोमेनाद्भुतकर्म्मणा ।
तारां जिहीर्षता पत्नीं भ्रातुराङ्गिरसस्य च ॥
सोऽप्ययाक्षीषितस्तेन बलिना क्रूरकर्म्मणा ।
अरण्यं गहनं घोरं प्रविवेश तदा प्रभुः ॥
ब्रह्मोवाच ।
यच्चारण्यमिदं धर्म्म ! त्वया व्याप्तं चिरं विभो ! ।
नाम्ना भविष्यति ह्येतद्धर्म्मारण्यमिति प्रभो ! ॥”
इति वराहपुराणम् ॥
(गयास्थतीर्थविशेषः । यथा, वायुपुराणे गयामाहात्म्ये ।
“प्रथमेऽह्नि विधिः प्रोक्तो द्वितीयदिवसे व्रजेत् ।
धर्म्मारण्यं तत्र धर्म्मो यस्माद्यज्ञमकारयत् ॥”)

धर्म्मासनं, क्ली, (धर्म्माय व्यवहारकार्य्यसाधनाय यदासनम् ।) विचारासनम् । वेञ्च् इति इंराजी भाषा । यथा,—
“धर्म्मासनमधिष्ठाय संवीताङ्गः समाहितः ।
प्रणम्य लोकपालेभ्यः कार्य्यदर्शनमारभेत् ॥”
इति मनुः । ८ । २३ ॥

धर्म्मिणी, स्त्री, (धर्म्मोऽस्या अस्तीति । इनिः । ङीप् ।) रेणुका । इति राजनिर्घण्टः ॥

धर्म्मी, [न्] (त्रि, धर्म्मोऽस्यास्तीति । धर्म्म+“अत इनिठनौ ।” ५ । २ । ११५ । इति इनिः ।) धर्म्मवान् । पुण्यशीलः । इति शब्दरत्नावली ॥ (पुं, विष्णुः । यथा, महाभारते ।१३।१४६।६४।
“धर्म्मगुप् धर्म्मकृद्धर्म्मी सदसत्क्षरमक्षरम् ॥”
“धर्म्माधारतया धर्म्मी ।” इति शाङ्करभाष्यम् ॥)

धर्म्मोपदेशकः, पुं, (धर्म्ममुपदिशतीति । उप+दिश+ण्वुल् ।) गुरुः । इति हेमचन्द्रः ।१।७७॥

धर्म्म्यः, त्रि, (धर्म्म+“धर्म्मपथ्यर्थन्यायादनपेते ।” ४ । ४ । ९२ । इति यत् ।) धर्म्मादनपेतः । धर्म्मयुक्तः । यथा, श्रीभगवद्गीतायाम् ।
“धर्म्म्याद्धि युद्धात् श्रेयोऽन्यत् क्षत्त्रियस्य न विद्यते ॥”
“न्यूनाधिकविभक्तानां धर्म्म्यः पितृकृतः स्मृतः ॥”
इति दायभागः ॥
(धर्म्मेण प्राप्यः । “नौवयोधर्म्मेति ।” ४।४।९१ । इति यत् धर्म्मलभ्यः । इति सिद्धान्तकौमुदी ॥)

धर्म्म्यविवाहः, पुं, (धर्म्म्यः धर्म्मार्हो विवाहः ।) विवाहविशेषः । स च पञ्चविधः । ब्राह्मदैवार्षगान्धर्व्वप्राजापत्यरूपः । अधर्म्म्यविवाहस्त्रिविधः । असुरराक्षसपैशाचरूपः । यथा,
“धर्म्म्येष्वेव विवाहेषु कालपरीक्षणं नाधर्म्म्येषु॥”
इत्युद्वाहतत्त्वम् ॥ (यस्य वर्णस्य यो विवाहो धर्म्म्यः स उक्तो यथा, मनौ । ३ । २१—२६ ।
“ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः ।
गान्धर्व्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ॥
यो यस्य धर्म्म्यो वर्णस्य गुणदोषौ च यस्य यौ ।
तद्वः सर्व्वं प्रवक्ष्यामि प्रसवे च गुणागुणान् ॥
षड़ानुपूर्व्व्या विप्रस्य क्षत्त्रस्य चतुरोऽरवान् ।
विट्शूद्रयोस्तु तानेव विद्याद्धर्म्म्यान राक्षसान् ॥
चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः ।
राक्षसं क्षत्त्रियस्यैकमासुरं वैश्यशूद्रयोः ॥
पञ्चानान्तु त्रयो धर्म्म्या द्वावधर्म्मौ स्मृताविह ।